# हिमाचल प्रदेश केंद्रीय विश्वविद्यालय
# Central University of Himachal Pradesh
(केंद्रीय विश्वविद्यालय अधिनियम2009 के तहत स्थापित)
धर्मशाला,जिला कांगड़ा-176215, हिमाचल प्रदेश

## संस्कृतपालिप्राकृतविभागस्य पाठ्यसमितेः त्रयोदशोपवेशनस्य (BoS-13) कार्यवृत्तम्

संस्कृतपालिप्राकृतविभागस्य पाठ्यसमितेः त्रयोदशोपवेशनम् (BoS-13) हिमाचलप्रदेशकेन्द्रीयविश्वविद्यालयस्य धर्मशालास्थिते धौलाधारपरिसर-1 इति स्थले 22 मार्च, 2023 तमे दिनाङ्के अपराह्ने 02 वादने प्रतिभासीयप्रत्यक्षमाध्यमाभ्यां सम्पन्नमभूत् । उपवेशनस्य शुभारम्भः वैदिकमन्त्रमङ्गलाचरणेन पाठ्यसमितेः अध्यक्षस्य संयोजकस्य च डॉ.बृहस्पतिमिश्रस्य औपचारिकस्वागतभाषणेन अभूत् ।

अत्र पाठ्यसमितेः सर्वे सम्मानितसदस्याः उपस्थिता आसन् । तेषां नामानि इत्थं सन्ति :

1. डॉ. बृहस्पतिमिश्रः, विभागाध्यक्षः, संस्कृतपालिप्राकृतविभागः (अध्यक्षः, पाठ्यसमितिः)
2. डॉ. नण्डूरी राजगोपालः, अधिष्ठाता, भाषासंकायः ( पदेन सदस्यः)
3. डॉ. वीरेन्द्रकुमारविद्यालंकारः, आचार्यः, विभागाध्यक्षः, संस्कृतविभागः, पंजाबविश्वविद्यालयः, चंडीगढ़ (बाह्यविशेषज्ञः ) (प्रतिभासीयमाध्यमेन)
4. डॉ. ब्रजेशपाण्डेयः, आचार्यः, संस्कृत एवं भारतीयाध्ययनसंकायः,जवाहरलालनेहरूविश्वविद्यालयः, कटवारियासरायः, नवदेहली (बाह्यविशेषज्ञः) (प्रतिभासीयमाध्यमेन)
5. डॉ. नण्डूरी राजगोपालः, सहाचार्यः, आंग्लविभागः, (कुलपतिद्वारा नामितःसदस्यः)
6. डॉ. ओ.एस.के.एस.शास्त्री, आचार्यः, भौतिकीखगोलविज्ञानविभागः (कुलपतिद्वारा नामितः सदस्यः)
7. डॉ. कुलदीप कुमारः, सहायकाचार्यः, संस्कृतपालिप्राकृतविभागः (विभागीयः वरिष्ठसदस्यः)

**संस्कृतपालिप्राकृतविभागस्य पाठ्यसमितेः अस्मिन् त्रयोदशोपवेशने (BoS-13) विभागाध्यक्षः अग्रलिखितां कार्यसूचीम् उपस्थापितवान्**

1. **विषयक्र0 - एस.के.टी./बी.ओ.एस.13.1-** 12सितम्बर , 2022तमे दिनाङ्के सम्पन्नस्य पाठ्यसमितेः द्वादशोपवेशनस्य (BoS-12) कार्यवृत्तस्य अनुमोदनहेतवे ।
2. **विषयक्र0 - एस.के.टी./बी.ओ.एस.13.2** -शास्त्रिचतुर्थसत्रस्य पाठ्यक्रमस्य अनुमोदनहेतवे ।
3. **विषयक्र0. :एस.के.टी./बी.ओ.एस. 13.3** – स्नातकोत्तरचतुर्थसत्रस्य पाठ्यक्रमस्य अनुमोदनहेतवे ।
4. **विषयक्र0 - एस.के.टी./बी.ओ.एस.13.4** - शोधार्थिनः दीपकनौटियालस्य अनुमोदितशोधविषयस्य नामोल्लेखस्य अनुमोदनहेतवे ।
5. **विषयक्र0 - एस.के.टी./बी.ओ.एस.13.5** - शास्त्रिणे निर्धारितायाः सेतुपरीक्षायाः मूल्याङ्कनप्रकारस्य अनुमोदनहेतवे ।
6. **विषयक्र0 - एस.के.टी./बी.ओ.एस.13.6** – संस्कृतपालिप्राकृतविभागे वसन्तसत्रे, 2023तमे ख्रीष्टाब्दे शास्त्री, बी.ए. (संस्कृत) , स्नातकोत्तर,विद्यावाचस्पति इत्येतेषु अध्ययनकार्यक्रमेषु पाठ्यमानानां पाठ्यक्रमाणां सूच्याः अनुमोदनार्थम् ।
7. **विषयक्र0 - एस.के.टी./बी.ओ.एस.13.7-** राष्ट्रियशिक्षानीतिः -2020 इत्यस्या अनुपालने शास्त्री, बी.ए. (संस्कृत), स्नातकोत्तर इत्येतेषु अध्ययनकार्यक्रमेषु आयोज्यमानानां परीक्षाणां मूल्याङ्कनप्रकारस्य अनुमोदनहेतवे ।

**विषयक्रमानुसारेण कार्यविवरणमित्थमस्ति-**

**एस.के.टी./बी.ओ.एस.13.1-** **12 सितम्बर , 2022तमे पाठ्यसमितेः द्वादशोपवेशनस्य (BoS-12) कार्यवृत्तस्य अनुमोदनहेतवे ।**

**कार्यविवरणम्** संस्कृतपालिप्राकृतविभागस्य पाठ्यसमितेः द्वादशोपवेशनस्य (BoS-12) कार्यवृत्तं संस्कृतपालिप्राकृतविभागस्य सहायक आचार्यः डॉ. कुलदीपकुमारः समितेः समक्षं प्रस्तुतवान् । समितिसदस्यैः गभीरविचारविमर्शानन्तरमस्य अनुमोदनं कृतम् । (संलग्नक -1)

**एस.के.टी./बी.ओ.एस.13.2 -** **शास्त्रिचतुर्थसत्रस्य पाठ्यक्रमस्य अनुमोदनहेतवे ।**

**कार्यविवरणम्** संस्कृतपालिप्राकृतविभागस्य शास्त्रिचतुर्थसत्रस्य पाठ्यक्रमः पाठ्यसमितिसदस्यैः विचारविमर्शानन्तरम् अनुमोदितः । (संलग्नक-2)

**एस.के.टी./बी.ओ.एस. 13.3 –** **स्नातकोत्तरचतुर्थसत्रस्य पाठ्यक्रमस्य अनुमोदनहेतवे ।**

**कार्यविवरणम्** संस्कृतपालिप्राकृतविभागस्य स्नातकोत्तरचतुर्थसत्रस्य पाठ्यक्रमः पाठ्यसमितिसदस्यैः विचारविमर्शानन्तरम् अनुमोदितः । (संलग्नक -3)

**एस.के.टी./बी.ओ.एस.13.4 -** **शोधार्थिनः दीपकनौटियालस्य अनुमोदितशोध-विषयस्य नामोल्लेखस्य अनुमोदनहेतवे ।**

**कार्यविवरणम्** शोधार्थिनः दीपकनौटियालस्य शोधविषयस्य अनुमोदनम् पाठ्यसमितेः पञ्चमोपवेशने (BoS-05) (15अक्टूबर, 2019) सर्वसम्मत्या जातमासीत् । किन्तु तत्र तस्य शीर्षकस्य शब्दशः उल्लेखो नास्ति । शोधार्थिनः दीपकनौटियालस्य शोधविषयः इत्थमस्ति **'सिन्धुकन्यागद्यकाव्यस्य भाषावैज्ञानिकाध्ययनम्'** । समितिसदस्यैः सर्वसम्मत्या अस्य नामोल्लेखनस्य अनुमोदनं कृतम् ।

**एस.के.टी./बी.ओ.एस.13.5 -** **शास्त्रिणे निर्धारितायाः सेतुपरीक्षायाः मूल्याङ्कनप्रकारस्य अनुमोदनहेतवे।**

**कार्यविवरणम्**

बी.ए.- संस्कृत (प्रतिष्ठा ) इति उपाधिं प्राप्तवताम् अध्ययनरतानां वा विद्यार्थिनां उपाधिपत्रे शास्त्रीति शब्दं योजयितुं विश्वविद्यालयद्वारा घटितायाः अधिकारप्राप्तसमितेः अनुशंसायाः फलस्वरूपं सेतुपरीक्षायाः व्यवस्था कृतासीत् । अस्याः मूल्याङ्कनप्रकारस्य स्पष्टप्रतिपत्त्यर्थं तस्य अनुमोदनम् आवश्यकमस्ति । सेतुपरीक्षायां साहित्यशास्त्रस्य चत्वारि प्रश्नपत्राणि निर्धारितानि आसन्। यत्र प्रतिप्रश्नपत्रं 04 श्रेयाङ्काः भविष्यन्ति । तेषां मूल्याङ्कनप्रकारः एवं विभक्तो भविष्यति-

मध्यसत्रपरीक्षा - 50 (25%)
सततम् आन्तरिकमूल्याङ्कनम् - 50 (25%)
सत्रान्तपरीक्षा - 100 (50%)
कुलयोगः =200 (100%)

एष मूल्याङ्कनप्रकारः पाठ्यसमितिसदस्यैः सर्वसम्मत्या अनुमोदितः ।

**एस.के.टी./बी.ओ.एस.13.6 -** **संस्कृतपालिप्राकृतविभागे वसन्तसत्रे, 2023तमे ख्रीष्टाब्दे शास्त्री, बी.ए. , स्नातकोत्तर,विद्यावाचस्पति इत्येतेषु अध्ययनकार्यक्रमेषु पाठ्यमानानां पाठ्यक्रमाणां सूच्याः अनुमोदनार्थम् ।**

**कार्यविवरणम्**

संस्कृतपालिप्राकृतविभागे वसन्तसत्रे, 2023तमे ख्रीष्टाब्दे शास्त्री, बी.ए. , स्नातकोत्तर,विद्यावाचस्पति इत्येतेषु अध्ययनकार्यक्रमेषु पाठ्यमानानां पाठ्यक्रमाणां सूचीम् अवलोक्य गहनं च विचार्य पाठ्यसमितिसदस्यैः सर्वसम्मत्या एषा सूची अनुमोदिता | (संलग्नक -4)

**एस.के.टी./बी.ओ.एस.13.7-** **राष्ट्रियशिक्षानीतिः -2020 इत्यस्या अनुपालने शास्त्री, बी.ए. (संस्कृत), स्नातकोत्तर(संस्कृत) इत्येतेषु अध्ययनकार्यक्रमेषु आयोज्यमानानां पूर्वयोजितानां वा परीक्षाणां मूल्याङ्कनप्रकारस्य अनुमोदनहेतवे।**

**कार्यविवरणम्**

राष्ट्रियशिक्षानीतिः -2020 इत्यस्या अनुपालने शास्त्री, बी.ए., स्नातकोत्तर इत्येतेषु अध्ययनकार्यक्रमेषु आयोज्यमानानां परीक्षाणां मूल्याङ्कनप्रकारः इत्थं भविता-

मध्यसत्रपरीक्षा - 20%
सततम् आन्तरिकमूल्याङ्कनम् - 20%
सत्रान्तपरीक्षा - 60%

2 श्रेयाङ्कवतां प्रश्नपत्राणां पूर्णाङ्काः शतं (100) 4 श्रेयाङ्कवतां प्रश्नपत्राणां च पूर्णाङ्काः द्विशतं (200) एव भविष्यन्ति किन्तु मूल्याङ्कनस्य विभागः उक्तरीत्या परिवर्तितः भविष्यति तथा च राष्ट्रियशिक्षानीतिः -2020 इत्यस्या अनुपालने शास्त्री, बी.ए.(संस्कृत), स्नातकोत्तर (संस्कृत) इत्येतेषु अध्ययनकार्यक्रमेषु पूर्वयोजितानां परीक्षाणां मूल्याङ्कनप्रकारः अपि पूर्वोक्तप्रकारेणैव अनुमन्यः अस्ति । एष परिवर्तितः विभागः समितिसदस्यैः सर्वसम्मत्या अनुमोदितः। ध्यातव्यमस्ति यत् पूर्वमेष विभागः मध्यसत्रपरीक्षायां 25% सततम् आन्तरिकमूल्याङ्कने 25% सत्रान्तपरीक्षायां च 50% आसीत् यः इदानीम् उक्तरीत्या परिवर्त्य अनुमोदितः।

अन्ते अध्यक्षेण भाषासंकायस्य अधिष्ठातृवर्यस्य, बाह्यविषयविशेषज्ञयोः, कुलपतिद्वारा नामितसदस्ययोः विभागीयसदस्यस्य च कृते कृतज्ञता प्रकटिता । अनेन कृतज्ञताप्रदर्शनेन तथा च सामूहिकमन्त्रोच्चारणेन साकमेव संस्कृतपालिप्राकृतविभागस्य पाठ्यसमितेः त्रयोदशम् उपवेशनं (BoS-13) संपन्नमभूत्।

1. डॉ. बृहस्पतिमिश्रः, विभागाध्यक्षः, संस्कृतपालिप्राकृतविभागः (अध्यक्षः, पाठ्यसमितिः)
2. डॉ. नण्डूरी राजगोपालः, अधिष्ठाता, भाषासंकायः ( पदेन सदस्यः)
3. डॉ. वीरेन्द्रकुमारविद्यालंकारः, आचार्यः, विभागाध्यक्षः, संस्कृतविभागः, पंजाबविश्वविद्यालयः, चंडीगढ़ (बाह्यविशेषज्ञः ) (प्रतिभासीयमाध्यमेन)
4. डॉ. ब्रजेशपाण्डेयः, आचार्यः, संस्कृत एवं भारतीयाध्ययनसंकायः, जवाहरलालनेहरूविश्वविद्यालयः, कटवारियासरायः, नवदेहली (बाह्यविशेषज्ञः) (प्रतिभासीयमाध्यमेन)
5. डॉ. नण्डूरी राजगोपालः, सहाचार्यः, आंग्लविभागः, (कुलपतिद्वारा नामितःसदस्यः)
6. डॉ. ओ.एस.के.एस.शास्त्री, आचार्यः, भौतिकीखगोलविज्ञानविभागः (कुलपतिद्वारा नामितः सदस्यः)
7. डॉ. कुलदीप कुमारः, सहायकाचार्यः, संस्कृतपालिप्राकृतविभागः (विभागीयः वरिष्ठसदस्यः)

विभागाध्यक्षः,
संस्कृतपालिप्राकृतविभागः

## कार्यालयीयः अनुवादः

## संस्कृत पालि एवं प्राकृत विभाग की
## पाठ्य समिति की (BoS-13) त्रयोदशी संगोष्ठी की बैठक का कार्यवृत्त

संस्कृत,पालि एवं प्राकृत विभाग की पाठ्यसमिति (BoS-13) त्रयोदशी की बैठक हिमाचल प्रदेश केंद्रीय विश्वविद्यालय के धर्मशालास्थित धौलाधारपरिसर-1 धौलाधारपरिसर-1 में 22 मार्च , 2023 को अपराह्न 02 : बजे प्रतिभासीय (online) और प्रत्यक्ष (offline) माध्यम से हुई। गोष्ठी का आरंभ वैदिक मंगलाचरण एवं पाठ्य समिति के अध्यक्ष एवं संयोजक डॉ.बृहस्पतिमिश्र के औपचारिक स्वागतभाषण से हुआ।

पाठ्यसमिति के सम्मानित सदस्यों के नाम इस प्रकार हैं :

1. डॉ. बृहस्पतिमिश्रः, विभागाध्यक्षः, संस्कृतपालिप्राकृतविभागः (अध्यक्षः, पाठ्यसमितिः)
2. डॉ. नण्डूरी राजगोपालः, अधिष्ठाता, भाषासंकायः ( पदेन सदस्यः)
3. डॉ. वीरेन्द्रकुमारविद्यालंकारः, आचार्यः, विभागाध्यक्षः, संस्कृतविभागः, पंजाबविश्वविद्यालयः, चंडीगढ़ (बाह्यविशेषज्ञः ) (प्रतिभासीयमाध्यमेन)
4. डॉ. ब्रजेशपाण्डेयः, आचार्यः, संस्कृत एवं भारतीयाध्ययनसंकायः,जवाहरलालनेहरूविश्वविद्यालयः, कटवारियासरायः, नवदेहली (बाह्यविशेषज्ञः) (प्रतिभासीयमाध्यमेन)
5. डॉ. नण्डूरी राजगोपालः, सहाचार्यः, आंग्लविभागः, (कुलपतिद्वारा नामितःसदस्यः)
6. डॉ. ओ.एस.के.एस.शास्त्री, आचार्यः, भौतिकीखगोलविज्ञानविभागः (कुलपतिद्वारा नामितः सदस्यः)
7. डॉ. कुलदीप कुमारः, सहायकाचार्यः, संस्कृतपालिप्राकृतविभागः (विभागीयः वरिष्ठसदस्यः)

**इस बैठक में विभागाध्यक्ष ने अग्रलिखित कार्यसूची उपस्थापित की**

- विषयक्र0 : एस.के.टी./बी.ओ.एस.13.1- 12 सितम्बर , 2022 को द्वादशी पाठ्य समिति (BoS-12) की बैठक के कार्यवृत का अनुमोदन हेतु।
- विषयक्र0 : एस.के.टी./बी.ओ.एस.13.2 - शास्त्री चतुर्थ सत्र के पाठ्यक्रम के अनुमोदन हेतु।
- विषयक्र0 : एस.के.टी./बी.ओ.एस. 13.3 – स्नातकोत्तर चतुर्थ सत्र के पाठ्यक्रम के अनुमोदन हेतु।

- विषयक्र0 : एस.के.टी./बी.ओ.एस.13.4 - शोधार्थी दीपक नौटियाल के अनुमोदित शोध विषय के नामोल्लेख के अनुमोदन हेतु ।
- विषयक्र0 : एस.के.टी./बी.ओ.एस.13.5 - शास्त्री सेतु की परीक्षा के प्रकार के अनुमोदन हेतु ।
- विषयक्र0 : एस.के.टी./बी.ओ.एस.13.6 - संस्कृत पालि एवं प्राकृत विभाग में वसंत सत्र, 2023 में पढाये जा रहे शास्त्री, बी.ए. , स्नातकोत्तर संस्कृत और पीएच.डी. कार्यक्रमों की विषय सूची के अनुमोदनार्थ।
- विषयक्र0 : एस.के.टी./बी.ओ.एस.13.7- राष्ट्रीय शिक्षा नीति -2020 की अनुपालना में शास्त्री बी.ए. तथा स्नातकोत्तर कक्षाओं में आयोजित की जाने वाली परीक्षाओं के मूल्यांकन प्रकार के अनुमोदन हेतु।

**कार्यवृत्त निम्नलिखित प्रकार से है:**

**एस.के.टी./बी.ओ.एस.13.1-** **12 सितम्बर , 2022 को पाठ्य समिति (BoS-12) की द्वादशी बैठक के कार्यवृत्त का अनुमोदन ।**

**कार्य विवरण**

संस्कृत पालि एवं प्राकृत विभाग की एकादशी पाठ्य समिति (BOS-12) के बारहवीं बैठक कार्यवृत्त डॉ. कुलदीप कुमार, सहायक आचार्य, संस्कृत पालि एवं प्राकृत विभाग द्वारा समिति के समक्ष प्रस्तुत किये गये। जिसका समिति के सदस्यों द्वारा विचार विमर्श करने के उपरांत अनुमोदन किया गया। (संलग्नक -1)

**एस.के.टी./बी.ओ.एस.13.2 -** **शास्त्री चतुर्थ सत्र के पाठ्यक्रम के अनुमोदन हेतु ।**

**कार्य विवरण**

संस्कृत पालि एवं प्राकृत विभाग में शास्त्री चतुर्थ सत्र के पाठ्यक्रम का पाठ्य समिति के सदस्यों द्वारा विचार विमर्श करने के उपरांत अनुमोदन किया। (संलग्नक -1)

**एस.के.टी./बी.ओ.एस. 13.3 –** **स्नातकोत्तर चतुर्थ सत्र के पाठ्यक्रम के अनुमोदन हेतु ।**

**कार्य विवरण**

संस्कृत पालि एवं प्राकृत विभाग में स्नातकोत्तर चतुर्थ सत्र के पाठ्यक्रम का पाठ्य समिति के सदस्यों द्वारा विचार विमर्श करने के उपरांत अनुमोदन किया गया। (संलग्नक -1)

**एस.के.टी./बी.ओ.एस.13.4 -** **शोधार्थी दीपक नौटियाल के अनुमोदित शोध विषय के नामोल्लेख के अनुमोदन ।**

**कार्य विवरण**

शोधार्थी दीपक नौटियाल के शोध विषय का अनुमोदन 5वी पाठ्य समिति (15 अक्टूबर, 2019) में कर दिया गया था।

किन्तु उसके शीर्षक का शब्दशः उल्लेख नहीं है। शोधार्थी दीपक नौटियाल का शोध विषय इस प्रकार से है **'सिन्धुकन्यागद्यकाव्यस्य भाषावैज्ञानिकाध्ययनम्'** जिसका पाठ्य समिति के सदस्यों ने शोध विषय का अनुमोदन किया।

**एस.के.टी./बी.ओ.एस.13.5 -**
**कार्य विवरण**

**शास्त्री सेतु की परीक्षा के प्रकार के अनुमोदन हेतु ।**

सेतु परीक्षा की व्यवस्था बी.ए. (संस्कृत - प्रतिष्ठा ) उपाधि प्राप्त एवं अध्ययनरत विद्यार्थियों को शास्त्री उपाधि प्रदान करने के लिए विश्वविद्यालय द्वारा गठित अधिकार प्राप्त समिति की अनुशंसा के फलस्वरूप की गयी थी| इसके मूल्यांकन प्रकार के स्पष्ट बोध के लिए उसका अनुमोदन आवश्यक हैं। सेतु परीक्षा में साहित्यशास्त्र के चार प्रश्नपत्र निर्धारित किये गये थे। जिसमे हर प्रश्न पत्र 04 श्रेयांक के होंगे एवं उनका मूल्यांकन प्रकार इस प्रकार विभक्त होगा।

मध्यसत्र परीक्षा - 50 (25%)
सतत आंतरिक मूल्यांकन - 50 (25%)
सत्रांत परीक्षा - 100 (50%)
कुल योग = 200 (100%)

जिसका पाठ्य समिति के सदस्यों ने अनुमोदन किया।

**एस.के.टी./बी.ओ.एस.13.6 -**

**संस्कृत पालि एवं प्राकृत विभाग में बसंत सत्र, 2023 में पढाये जा रहे शास्त्री, बी.ए. (संस्कृत), स्नातकोत्तर (संस्कृत) और पीएच.डी. कार्यक्रमों की विषय सूची के अनुमोदनार्थ।**

**कार्य विवरण**

संस्कृत पालि एवं प्राकृत विभाग में बसंत सत्र, 2023 में पढाये जा रहे शास्त्री, बी.ए. , स्नातकोत्तर संस्कृत और पीएच.डी. कार्यक्रमों की विषय सूची का पाठ्य समिति के सदस्यों ने गहन विचार करने के उपरांत अनुमोदन किया|

**एस.के.टी./बी.ओ.एस.13.7-**

**राष्ट्रीय शिक्षा नीति -2020 की अनुपालना में शास्त्री बी.ए. तथा स्नातकोत्तर कक्षाओं में आयोजित की जाने वाली परीक्षाओं के मूल्यांकन प्रकार के अनुमोदन हेतु।**

**कार्य विवरण**

राष्ट्रीय शिक्षा नीति -2020 की अनुपालना में शास्त्री, बी.ए. (संस्कृत) तथा स्नातकोत्तर (संस्कृत) कक्षाओं में आयोजित की जाने वाली परीक्षाओं का मूल्यांकन इस प्रकार होगा :

मध्यसत्र परीक्षा - 20%
सतत आंतरिक मूल्यांकन - 20%
सत्रांत परीक्षा - 60%

2 श्रेयांक वाले प्रश्न पत्रों का पूर्णांक 100 एवं 4 श्रेयांक वाले प्रश्नपत्रों का पूर्णाक 200 ही रहेगा किन्तु मूल्यांकन का विभाग उक्त रीति से परिवर्तित हो जायेगा। ध्यातव्य है कि पहले यह विभाजन मध्य सत्र परीक्षा में 25% सतत आंतरिक मूल्यांकन में 25% एवं सत्रांत परीक्षा में 50% था। किन्तु विश्वविद्यालय के नियमानुसार उक्त क्रम से परिवर्तन कर दिया गया। यह उक्त मूल्यांकन व्यवस्था राष्ट्रीय शिक्षा नीति -2020 की अनुपालना में शास्त्री, बी.ए. (संस्कृत) तथा स्नातकोत्तर (संस्कृत) की कक्षाओं में पूर्व में आयोजित की गई परीक्षाओं में भी अनुमन्य है। जिसका समिति सदस्यों द्वारा अनुमोदन किया गया।

अंत में अध्यक्ष के द्वारा अधिष्ठाता महोदय, बाह्यविषयविशेषज्ञों, कुलपति द्वारा नामित सदस्यों एवं विभागीयसदस्य का आभार प्रकट किया गया। इस आभार प्रदर्शन तथा सामूहिक वैदिक मन्त्रोच्चारण के साथ ही संस्कृत पाली एवं प्राकृतविभाग की पाठ्यसमिति का त्रयोदश उपवेशन संपन्न हुआ।

1. डॉ. बृहस्पतिमिश्रः, विभागाध्यक्षः, संस्कृतपालिप्राकृतविभागः (अध्यक्षः, पाठ्यसमितिः)
2. डॉ. नण्डूरी राजगोपालः, अधिष्ठाता, भाषासंकायः ( पदेन सदस्यः)
3. डॉ. वीरेन्द्रकुमारविद्यालंकारः, आचार्यः, विभागाध्यक्षः, संस्कृतविभागः, पंजाबविश्वविद्यालयः, चंडीगढ़ (बाह्यविशेषज्ञः ) (प्रतिभासीयमाध्यमेन)
4. डॉ. ब्रजेशपाण्डेयः, आचार्यः, संस्कृत एवं भारतीयाध्ययनसंकायः,जवाहरलालनेहरूविश्वविद्यालयः, कटवारियासरायः, नवदेहली (बाह्यविशेषज्ञः) (प्रतिभासीयमाध्यमेन)
5. डॉ. नण्डूरी राजगोपालः, सहाचार्यः, आंग्लविभागः, (कुलपतिद्वारा नामितःसदस्यः)
6. डॉ. ओ.एस.के.एस.शास्त्री, आचार्यः, भौतिकीखगोलविज्ञानविभागः (कुलपतिद्वारा नामितः सदस्यः)
7. डॉ. कुलदीप कुमारः, सहायकाचार्यः, संस्कृतपालिप्राकृतविभागः (विभागीयः वरिष्ठसदस्यः)

24-4-2023

विभागाध्यक्षः,
संस्कृत पालि एवं प्राकृत विभागः

स- 1
BoS- 13.1


# हिमाचल प्रदेश केन्द्रीय विश्वविद्यालय
# Central University of Himachal Pradesh

धौलाधार परिसर I -, धर्मशाला, जिला कांगड़ा -, हिमाचल प्रदेश -176215
Dhauladhar Campus - I, Dharamshala, District Kangra (HP)-176215
Website:http://www.cuhimachal.ac.in


आज़ादी का अमृत महोत्सव

## संस्कृत-पालि-प्राकृतविभागस्य द्वादशपाठ्यसमितेः (BoS-12) कार्यवृत्तम्

संस्कृत-पालि-प्राकृतविभागस्य द्वादशपाठ्यसमितेः (BoS-12) गोष्ठी संस्कृत-पालि-प्राकृतविभागस्य विभागाध्यक्षस्य अध्यक्षतायां 12 सितम्बर , 2022 इति दिनाङ्के हि.प्र. के.वि. वि. धौलाधार परिसर -1 इत्यत्र पूर्वाह्ने 3:30 वादने प्रत्यक्षतया तथा प्रतिभासीयमाध्यमेन सम्पन्ना । अस्या आरम्भः पाठ्य- समितेः अध्यक्षस्य संयोजकस्य च डॉ.बृहस्पतिमिश्रस्य औपचारिकेण स्वागतभाषणेन अभवत् ।

अत्र सर्वे सदस्याःउपस्थिता आसन् | तेषां नामानि इत्थं सन्ति :

1. डॉ. बृहस्पतिमिश्रः,विभागाध्यक्षः, संस्कृत-पालि-प्राकृतविभागः, (अध्यक्षः संयोजकश्च, पाठ्यसमितेः)
2. डॉ. एन.आर. गोपालः, अधिष्ठाता, भाषासंकायस्य (सदस्यः )
3. प्रो. हर्षमेहता, सेवानिवृत्त आचार्यः, पंजाबविश्वविद्यालयस्य (तलवाड़ाटाउनशिप, होशियारपुरम् (बाह्यविशेषज्ञः) (प्रतिभासीयमाध्यमेन)
4. डॉ० ओम्दत्तसरोचः, सेवानिवृत्तप्राचार्यः- संस्कृतमहाविद्यालयः, चकमोहः , हमीरपुरम् ( बाह्यविशेषज्ञः) (प्रतिभासीयमाध्यमेन)
5. डॉ.एन.आर. गोपालः , सहाचार्यः – आंग्लविभागः (कुलपतिद्वारानामितसदस्यः)
6. प्रो. ओ.एस.के. एस. शास्त्री, आचार्यः –भौतिकीखगोलविज्ञानविभागः (कुलपतिद्वारानामितसदस्यः) (प्रतिभासीयमाध्यमेन)
7. डॉ. कुलदीपःकुमार , सहायक आचार्यः- संस्कृत-पालि-प्राकृतविभागः (विभागीयसदस्यः)

**अस्मिन् उपवेशने विभागाध्यक्षेण एषा कार्यसूची उपस्थापिता-**

- 12.1 14 मार्च, 2022तमे दिनाङ्के सम्पन्नस्य एकादशपाठ्यसमितेः (BoS-11) उपवेशनस्य कार्यवृत्तस्य अनुमोदनम् |
- 12.2 बी.ए .संस्कृतप्रतिष्ठायाः उपाधिपत्रे "शास्त्री" इति पदं लेखितुं निर्धारितपाठ्यक्रमस्य नाम सेतुपाठ्यक्रम इति करणम् |
- 12.3- शास्त्रिणः द्वितीयसत्रे आंग्लविषयस्य 04 श्रेयाङ्काः पाठनीया आसन् किन्तु 02 श्रेयाङ्कयोः एव अध्यापनमभूत् | अतः अवशिष्टयोः द्वयोः श्रेयाङ्कयोः अध्यापनं तृतीयसत्रे कारयितुम् अनुमतिप्राप्तिः |
- संस्कृत-पालि-प्राकृतविभागे लेखनीयानां सर्वेषां लघुशोधप्रबन्धानां, शोधप्रबन्धानां लेखनं, सर्वासु परीक्षासु लेखनं एवं सर्वाणि प्रदत्तकार्याणि च संस्कृतमाध्यमेनैव भवन्ति | अस्य कार्योत्तरस्वीकृतिः अपेक्षिता अस्ति | भाविनि कालेपि एतत्सर्वं कार्यं संस्कृतमाध्यमेनैव कारयितुमनुमतिप्राप्तिः |
- 12.5 - शास्त्रितृतीयसत्रे स्नातकोत्तरतृतीयसत्रे च सर्वेषां नूतनानाम् अध्यापनीयविषयानामनुमोदनम् |
- 12.6- SKT-311 " भारतीयदर्शनं विशेषतो योगः" SKT-476 "शुद्धोच्चारणम्" इत्यनयोः पाठ्यक्रमयोः कृतस्य संशोधनस्य अनुमोदनम् ।
- 12.7 - डॉ. बृहस्पतिमिश्रस्य सहनिर्देशने श्रीजगदीशप्रसादझाबरमलटिबड़ेवालाविश्वविद्यालयस्य झुंझनूस्थस्य शोधच्छात्रायाः श्रीमत्याः शालिनीतिनामधेयायाः , शोधप्रबन्धस्य विश्वविद्यालये समर्पणस्य सूचना अनुमोदनं च |
- कश्चन अन्यः विषयः अध्यक्षमहोदयद्वारा उपस्थापयितुं शक्यते यः अस्यां सूच्यां न भवेत्।

## अस्या: कार्यवृत्तम् इत्थम् अस्ति :

**विषयक्र. : एस.के.टी./बी.ओ.एस.12/1** -14 मार्च, 2022 इति दिनाङ्के एकादशपाठ्यसमितेः(BoS-11) उपवेशनस्य कार्यवृत्तस्य अनुमोदनम्।

**कार्यविवरणम्**

संस्कृत-पालि-प्राकृतविभागस्य एकादशपाठ्यसमितेः (BOS-11) कार्यवृत्तं संस्कृत- पालि-प्राकृतविभागस्य सहायकाचार्येण डॉ. कुलदीपकुमारेण समितेः समक्षं प्रस्तुतम्। तच्च समितिसदस्यैः विमृश्य अनुमोदितम्। (संलग्नक -1 )

**विषयक्र : एस.के.टी./बी.ओ.एस.12/2-** बी.ए. संस्कृतम् (प्रतिष्ठा) इत्यस्य उपाधिपत्रे "शास्त्री" इति शब्दं लेखितुं निर्धारितस्य पाठ्यक्रमस्य नाम सेतुपाठ्यक्रम इति कर्तुम्।

**कार्यविवरणम्**

समितिसदस्यैः अत्र विषये विमृश्य बी.ए. संस्कृतम् (प्रतिष्ठा) इत्यस्य उपाधिपत्रे "शास्त्री" इति शब्दं लेखितुं निर्धारितस्य पाठ्यक्रमस्य नाम सेतुपाठ्यक्रम इति कृतम्।

। अस्मिन् विषये सदस्यानां विचारणा एषा आसीत् यत् बी.ए. संस्कृतम् (प्रतिष्ठा ) इत्युपाधिं "शास्त्री" इत्युपाधिना सेतुवत् योजकत्वात् अस्य पाठ्यक्रमस्य सेतुपाठ्यक्रम इति नामकरणम् उचितम् अस्ति।

**विषयक्र : एस.के.टी./बी.ओ.एस.12/3-** शास्त्रिणः द्वितीयसत्रे आंग्लविषयस्य 04 श्रेयाङ्काः पाठनीया आसन् किन्तु 02 श्रेयाङ्कयोः एव

अध्यापनमभूत्। अत: अवशिष्टयोः द्वयोः श्रेयाङ्कयोः अध्यापनं तृतीयसत्रे कारयितुम् अनुमतिः अपेक्षिता।

**कार्यविवरणम्**

समितेः सर्वैः सदस्यैः शास्त्रिणः द्वितीयसत्रे आंग्लविषयस्य अवशिष्टयोः द्वयोः श्रेयाङ्कयोः अध्यापनं तृतीयसत्रे कारयितुम् अनुमतिः प्रदत्ता। समित्या एष विचारः व्यक्तीकृतः यत् छात्रहिताय तेषां श्रेयाङ्कपूर्तिः आवश्यकी अस्ति यतो हि अपेक्षितश्रेयाङ्कानां पूर्णतायामेव छात्रा उपाधिम् अर्जितं कर्तुं शक्यन्ति।

**विषयक्र : एस.के.टी./बी.ओ.एस.12/4-**

संस्कृत-पालि-प्राकृतविभागे लेखनीयानां सर्वेषां लघुशोधप्रबन्धानां, शोधप्रबन्धानां लेखनं, सर्वासु परीक्षासु लेखनं एवं सर्वाणि प्रदत्तकार्याणि च संस्कृतमाध्यमेनैव भवन्ति। अस्य कार्योत्तरस्वीकृतिः अपेक्षिता अस्ति । भाविनि कालेपि एतत्सर्वं कार्यं संस्कृतमाध्यमेनैव कारयितुमनुमतिप्राप्त्यर्थम .

**कार्यविवरणम्**

समितेः सर्वैः सदस्यैः हिमाचलप्रदेश-केन्द्रीय-विश्वविद्यालयस्य संस्कृतविभागद्वारा स्वीयं सर्वं कार्यजातं संस्कृतमाध्यमेनैव कर्तुं प्रतिबद्धतायामत्यन्तं हर्षं व्यक्तीकृतः विभागेषु लेखिष्यमाणाः शोधप्रबन्धाः, लघुशोधप्रबन्धाः , सर्वासु परीक्षासु लेखनं, प्रस्तुतिरित्यादि सर्वं प्रदत्तकार्यं संस्कृतमाध्यमेनैव कारयितुं कार्योत्तरस्वीकृतिं प्रददद्भिः भविष्यत्यपि सर्वं कार्यं संस्कृतमाध्यमेन कारयितुम् अनुमोदनं च कृतम्।

**विषयक्र : एस.के.टी./बी.ओ.एस.12/5** - शास्त्रितृतीयसत्रे स्नातकोत्तरतृतीयसत्रे च सर्वेषां नूतनानाम् अध्यापनीयविषयानामनुमोदनहेतवे।

**कार्यविवरणम्**

समित्या गहनं विचार्य शास्त्रितृतीयसत्रे स्नातकोत्तरतृतीयसत्रे च सर्वेषां प्रस्तावितानां नूतनानाम् अध्यापनीयविषयाना पाठ्यक्रमस्य अनुमोदनं कृतम्। (संलग्नक -2 )

**विषयक्र : एस.के.टी./बी.ओ.एस.12/6-** SKT-311 " भारतीयदर्शनं विशेषतो योग:" SKT-476 "शुद्धोच्चारणम्" इत्यनयोः पाठ्यक्रमयोः कृतस्य संशोधनस्य अनुमोदनहेतवे |

**कार्यविवरणम्**

विभागाध्यक्षेण विषयः प्रस्तुतः यत् छात्राणामनुरोधेन तेषाञ्च हितकाम्यया SKT-311 " भारतीयदर्शनं विशेषतो योग:" इति पाठ्यक्रमे सांख्यदर्शनस्य अंशः अपाकृतः यतोहि अस्य पाठनं पूर्वमभूत् बौद्धजैनदर्शनयोश्च सामान्यपरिचयः योजितः | एवमेव SKT-476 "शुद्धोच्चारणम्" इति पाठ्यक्रमे केचन अधिकोपयोगिनः अंशाः योजिताः | समितेः सर्वैः सदस्यैः द्वयोः पाठ्यक्रमयोः संशोधितांशानां गहनं पर्यालोचनं कृतं छात्रेभ्यश्च एतानधिकोपयोगिनः मन्यमानैः अनयोः संशोधितयोः पाठ्यक्रमयोः अनुमोदनं कृतम् | (संलग्नक -3 )

**विषयक्र : एस.के.टी./बी.ओ.एस.12/7** -डॉ. बृहस्पतिमिश्रस्य सहनिर्देशने श्रीजगदीशप्रसादझावरमलटिबड़ेवालाविश्वविद्यालयस्य झुँझनूस्थस्य शोधच्छात्रायाः श्रीमत्याः शालिनीतिनामधेयायाः , शोधप्रबन्धस्य विश्वविद्यालये समर्पणस्य सूचनार्थम् अनुमोदनार्थं च |

**कार्यविवरणम्**

समितेः सर्वैः सदस्यैःडॉ. बृहस्पतिमिश्रस्य सहनिर्देशने श्रीजगदीशप्रसादझावरमलटिबड़ेवालाविश्वविद्यालयस्य झुँझनूस्थस्य शोधच्छात्रायाः श्रीमत्याः शालिनीतिनामधेयायाः , शोधप्रबन्धस्य विश्वविद्यालये समर्पणस्य सूचनायां हर्षः व्यक्तीकृतः | अस्य अनुमोदनं च कृतम् | (संलग्नक -4 )

**विषयक्र : एस.के.टी./बी.ओ.एस.12/8**-कार्यसूच्यामसन्नपि विभागाध्यक्षेण तत्कालमेव SKT-431 "तर्कसिद्धान्ताः" इति पत्रस्य नाम्नः आंग्लभाषानुवादस्य विषयः स्थापितः |

**कार्यविवरणम्**

विभागाध्यक्षेण विषयः प्रस्तुतः यत् असंस्कृतज्ञानां जनानामपि अन्तर्वस्तुनः ज्ञानं स्यात् इत्येतदर्थं अस्य नाम्नः आंग्लभाषानुवादः समीचीनः भविष्यति गहनविचारानन्तरं समित्या अध्यक्षद्वारा प्रस्तुतस्य अस्य विषयस्य सर्वसम्मत्या अनुमोदनंकृतम् | अनुमोदनानन्तरम् अस्य विषयस्य नाम भविष्यति- SKT-431 "तर्कसिद्धान्ताः (Introduction to Nyaya and Vaisheshika Philosophy)

अन्ते अध्यक्षद्वारा बाह्यविषयविशेषज्ञयोः,कुलपतिद्वारानामितसदस्ययोः,विभागीयसदस्यस्य, भाषासंकायस्य अधिष्ठातुश्च धन्यवादः प्रकटितः | अनेनैव सह संस्कृत-पालि-प्राकृतविभागस्य द्वादशपाठ्यसमितेः उपवेशनं पूर्णतां गतम् |

1. डॉ. बृहस्पतिमिश्रः,विभागाध्यक्षः, संस्कृत-पालि-प्राकृतविभागः, (अध्यक्षः विभागस्य, संयोजकश्च पाठ्यसमितेः)
2. डॉ. एन.आर. गोपालः, अधिष्ठाता, भाषासंकायस्य (सदस्यः )
3. प्रो. हर्षमेहता, सेवानिवृत्त आचार्यः, पंजाबविश्वविद्यालयस्य (तलवाड़ा टाउनशिप, होशियारपुरम् (बाह्यविशेषज्ञः ) (प्रतिभासीयमाध्यमेन)
4. डॉ० ओम्दत्तसरोचः, सेवानिवृत्तप्राचार्यः- संस्कृतमहाविद्यालयः, चकमोहः , हमीरपुरम् ( बाह्यविशेषज्ञः ) (प्रतिभासीयमाध्यमेन)
5. डॉ.एन.आर. गोपालः , सहाचार्यः – आंग्लविभागः (कुलपतिद्वारा नामितसदस्यः)
6. प्रो. ओ.एस.के. एस. शास्त्री, आचार्यः –भौतिकीखगोलविज्ञानविभागः (कुलपतिद्वारा नामितःसदस्यः) (प्रतिभासीयमाध्यमेन)
7. डॉ. कुलदीपःकुमार , सहायक आचार्यः- संस्कृत-पालि-प्राकृतविभागः (विभागीयसदस्यः)

विभागाध्यक्ष
संस्कृत पालि एवं प्राकृत विभाग

(हिंदी में कार्यालय अनुवाद)

## संस्कृत पालि एवं प्राकृत विभाग की द्वादशी पाठ्य समिति के कार्यवृत्त

संस्कृत,पालि एवं प्राकृत विभाग की द्वादशी पाठ्यसमिति (BoS-12)की बैठक हिमाचल प्रदेश केंद्रीय विश्वविद्यालय के धर्मशालास्थित धौलाधारपरिसर-1में12 सितम्बर , 2022कोअपराह्न 3:30 : बजे प्रतिभासीय माध्यम से हुई। गोष्ठी का आरंभ पाठ्य समिति के अध्यक्ष एवं संयोजक डॉ.बृहस्पतिमिश्र के औपचारिक स्वागतभाषण से हुआ ।

इसमें सभी सदस्य रहे जिनके नाम इस प्रकार हैं :

1. डॉ. बृहस्पति मिश्र,विभागाध्यक्ष- संस्कृत पालि एवं प्राकृत विभाग, (अध्यक्ष एवं संयोजक, पाठ्य समिति)
2. डॉ. एन.आर. गोपाल, अधिष्ठाता, भाषा संकाय (सदस्य )
3. प्रो. हर्ष मेहता, सेवानिवृत्त , आचार्य - पंजाब विश्वविद्यालय (तलवाड़ा टाउनशिप होशियारपुर (बाह्यविशेषज्ञ ) (प्रतिभासीय माध्यम से)
4. डॉ० ओम दत्त सरोच, सेवानिवृत प्राचार्य- संस्कृत महाविद्यालय, चकमोह , हमीरपुर ( बाह्यविशेषज्ञ) (प्रतिभासीय माध्यम से)
5. डॉ.एन.आर. गोपाल , सह-आचार्य – अंग्रेजी विभाग (कुलपतिद्वारा नामित सदस्यः)
6. प्रो. ओ.एस.के. एस.शास्त्री, आचार्य –भौतिकी एवं खगोल विज्ञान विभाग (कुलपतिद्वारा नामितः सदस्यः) (प्रतिभासीय माध्यम से)
7. डॉ. कुलदीप कुमार , सहायक आचार्य- संस्कृत पालि एवं प्राकृत विभाग (विभागीय सदस्यः)

**इस बैठक के लिए विभागाध्यक्ष ने इस कार्यसूची का उपस्थापन किया-**

- 12.1 14 मार्च, 2022 को एकादशी पाठ्य समिति(BoS-11) की बैठक के कार्यवृत का अनुमोदन हेतु |
- 12.2 संस्कृत ओनर्स के उपाधि पत्र में "शास्त्री" इस पद को लिखने के लिए निर्धारित पाठ्यक्रम का नाम सेतु पाठ्यक्रम करने हेतु ·
- 12.3- शास्त्री द्वितीय सत्र में अंग्रेजी के 04 क्रेडिट पढाये जाने थे किन्तु 02 क्रेडिट का ही अध्यापन हुआ| अत: अवशिष्ट 02 क्रेडिट का अध्यापन तृतीय सत्र में करवाने की अनुमति हेतु |
- 12.4संस्कृत पालि एवं प्राकृत विभाग में लिखे जाने वाले सभी लघु शोध प्रबंध, शोध प्रबंध , सभी परीक्षाओं में लेखन एवं सभी प्रदत्त कार्य संस्कृत माध्यम में ही हो रहे है | इसकी कार्योत्तर स्वीकृति अपेक्षित है | भविष्य में भी यह सब कार्य संस्कृत माध्यम से करवाने की अनुमति हेतु |
- 12.5 - शास्त्री तृतीय सत्र में एवं स्नातकोत्तर तृतीय सत्र में सभी नूतन अध्यापनीय विषयों के अनुमोदन हेतु |
- 12.6-SKT-311 " भारतीयदर्शनं विशेषतो योग: इस पाठ्यक्रम में किये गये संशोधन के अनुमोदन हेतु |
- 12.7 -डॉ. बृहस्पति मिश्र के सह-निर्देशन में श्रीमती शालिनी शोध-छात्रा, श्री जगदीश प्रसाद झावरमल टिबड़ेवाला, विश्वविद्यालय झुनझुन का शोध प्रबंन्ध विश्वविद्यालय में जमा करवाने के सम्बन्ध में सूचनार्थ एवं अनुमोदन हेतु |
- कोई अन्य विषय जो इस कार्य सूची में न हो अध्यक्ष महोदय के द्वारा गोष्ठी में रखा जा सकता है।

## कार्यवृत्त इस प्रकार है-

**विषयक : एस.के.टी./बी.ओ.एस.12/1** -14 मार्च, 2022 को एकादशी पाठ्य समिति(BoS-11) की वैठक के कार्यवृत्त का अनुमोदन

**कार्य विवरण**

संस्कृत पालि एवं प्राकृत विभाग की एकादशी पाठ्य समिति (BOS-11) के कार्यवृत्तडॉ. कुलदीप कुमार, सहायक आचार्य संस्कृत पालि एवं प्राकृत विभाग द्वारा समिति के समक्ष प्रस्तुत किये गये | जिसका समिति के सदस्यों द्वारा विचार विमर्श करने के उपरांत अनुमोदन (संलग्नक -1 ) किया गया |

**विषयक : एस.के.टी./बी.ओ.एस.12/2-** बी.ए. संस्कृत ऑनर्स के उपाधि पत्र में "शास्त्री" इस शब्द को लिखने के लिए निर्धारित पाठ्यक्रम का नाम सेतु पाठ्यक्रम करने हेतु

**कार्य विवरण**

समिति सदस्यों ने इस विषय पर विचार-विमर्श के बाद बी.ए. संस्कृत (आनर्स ) के उपाधि पत्र में "शास्त्री" शब्द को जोड़ने के लिए निर्धारित पाठ्यक्रम का नामकरण सेतु पाठ्यक्रम के रूप में किये जाने का अनुमोदन कर दिया | सदस्यों का विचार यह था कि बी.ए. "शास्त्री" उपाधि से सेतु के समान जोड़ने वाला होने के कारण इसका नाम सेतु पाठ्यक्रम रखना उचित है |

**विषयक : एस.के.टी./बी.ओ.एस.12/3-** शास्त्री द्वितीय सत्र में अंग्रेजी के 04 क्रेडिट पढाये जाने थे किन्तु 02 क्रेडिट का ही अध्यापन हुआ| अत: अवशिष्ट 02 क्रेडिट का अध्यापन तृतीय सत्र में करवाने की अनुमति हेतु |

**कार्य विवरण**

समिति के सभी सदस्यों ने शास्त्री द्वितीय सत्र में अंग्रेजी के 02 क्रेडिट शास्त्री तृतीय सत्र में पढ़ायें जाने की अनुमति प्रदान कर दी | समिति ने यह विचार व्यक्त किया कि छात्रहितों को ध्यान में रखते हुए उनके श्रेयांकों की पूर्णता आवश्यक है क्योंकि अपेक्षित श्रेयांकों की पूर्णता होने पर ही छात्र अपनी उपाधि अर्जित कर सकेंगे |

**विषयक : एस.के.टी./बी.ओ.एस.12/4-**संस्कृत पालि एवं प्राकृत विभाग में लिखे जाने वाले सभी लघु शोध प्रबंध, शोध प्रबंध , सभी परीक्षाओं में लेखन एवं सभी प्रदत्त कार्य संस्कृत माध्यम में ही हो रहे है | इसकी कार्योत्तर स्वीकृति अपेक्षित है | भविष्य में भी यह सब कार्य संस्कृत माध्यम से करवाने की अनुमति हेतु |

**कार्य विवरण**

समिति के सभी सदस्यों ने हिमाचल प्रदेश केन्द्रीय विश्वविद्यालय के संस्कृत विभाग के द्वारा अपने सभी कार्य संस्कृत माध्यम से ही कराने की प्रतिबद्धता पर अत्यन्त हर्ष व्यक्त किया और विभाग में लिखे जाने वाले सभी शोध-प्रबंध, लघु शोध प्रबंध , सभी परीक्षाओं में लेखन, प्रस्तुति एवं सभी प्रदत्त कार्य संस्कृत माध्यम में कराने की कार्योत्तर स्वीकृति प्रदान करते हुए भविष्य में भी सभी कार्य संस्कृत में कराने का अनुमोदन किया |

**विषयक : एस.के.टी./बी.ओ.एस.12/5** - शास्त्री तृतीय सत्र में एव स्नातकोत्तर तृतीय सत्र में सभी नूतन अध्यापनीय विषयों के अनुमोदन हेतु |

**कार्य विवरण**

समिति ने गहन विचार के वाद शास्त्री तृतीय सत्र में एवं स्नातकोत्तर तृतीय सत्र में पढ़ायें जाने के लिए प्रस्तावित सभी नवीन पाठ्यक्रमों (संलग्नक -2 ) का अनुमोदन कर दिया |

**विषयक : एस.के.टी./बी.ओ.एस.12/6**-SKT-311 " भारतीयदर्शनं विशेषतो योग: , SKT-476 "शुद्धोच्चारणम" इस पाठ्यक्रम में वि संशोधन के अनुमोदन हेतु |

**कार्य विवरण**

समिति के सभी सदस्यों ने दोनों पाठ्यक्रमों के संशोधित अंशो का गहन पर्यालोचन किया और इन्हें छात्रों के लिए अधिक उ मानते हुए इनका अनुमोदन कर दिया | (संलग्नक -3 )

**विषयक : एस.के.टी./बी.ओ.एस.12/7** -डॉ. बृहस्पति मिश्र के सह-निर्देशन में श्रीमती शालिनी शोध-छात्रा, श्री जगदीश प्रसाद झाव टिबड़ेवाला, विश्वविद्यालय झुंझनू का शोध प्रबन्ध विश्वविद्यालय में जमा करवाने के सम्बन्ध में सूचनार्थ एवं अनुमोदन हेतु |

**कार्य विवरण**

समिति के सभी सदस्यों ने डॉ. बृहस्पति मिश्र के सह-निर्देशन में श्रीमती शालिनी , शोध- छात्रा, श्री जगदीश प्रसाद झावरमल टिबड़ेवाला विश्वविद्य , झुँझनू का शोध प्रबंध विश्वविद्यालय में जमा करवाने की सूचना पर हर्ष व्यक्त किया और उसका अनुमोदन किया | (संलग्नक -4 )

**विषयक्र : एस.के.टी./बी.ओ.एस.12/8**-SKT- 431 "तर्कसिद्धान्ता:"के पाठ्यक्रम के नाम के अंग्रेजी अनुवाद के संदर्भ में | (कार्यसूची में न होने भी विभागाध्यक्ष द्वारा तत्काल प्रस्तुत )

**कार्य विवरण**

विभागाध्यक्ष, द्वारा यह विषय प्रस्तुत किया गया कि संस्कृत न जानने वाले जनों को भी नाम सुनते ही पाठ्यक्रम की अन्तर्वस्तु का ज्ञान हो सके, इस नाम का अंग्रेजी अनुवाद आवश्यक हैं | गहन विचार के बाद अध्यक्ष द्वारा प्रस्तुत इस विषय का समिति ने सर्व सम्मति से अनुमोदन कर दिय अनुमोदन के बाद इस विषय का नाम SKT-431 "तर्कसिद्धान्ता: (Introduction to Nyaya and Vaisheshika Philosophy)

होगा |

अंत में अध्यक्ष के द्वारा बाह्यविषयविशेषज्ञों, कुलपति के द्वारा नामित सदस्यों एवं विभागीयसदस्य का आभार प्रकट किया गय इस आभार प्रदर्शन के साथ ही संस्कृत पाली एवं प्राकृतविभाग की पाठ्यसमिति का द्वादश उपवेशन संपन्न हुआ।

1. डॉ. बृहस्पति मिश्र,विभागाध्यक्ष- संस्कृत पालि एवं प्राकृत विभाग, (अध्यक्ष एवं संयोजक, पाठ्य समिति)
2. डॉ. एन.आर. गोपाल, अधिष्ठाता, भाषा संकाय (सदस्य )
3. प्रो. हर्ष मेहता, सेवानिवृत, आचार्य - पंजाब विश्विद्यालय (तलवाड़ा टाउनशिप होशियारपुर (बाह्यविशेषज्ञ ) (प्रतिभासीय माध्यम से)
4. डॉ० ओम दत्त सरोच, सेवानिवृत प्राचार्य- संस्कृत महाविद्यालय, चकमोह , हमीरपुर ( बाह्यविशेषज्ञ) (प्रतिभासीय माध्यम से)
5. डॉ.एन.आर. गोपाल , सह-आचार्य – अंग्रेजी विभाग (कुलपतिद्वारा नामित सदस्य:)
6. प्रो. ओ.एस.के. एस.शास्त्री, आचार्य –भौतिकी एवं खगोल विज्ञान विभाग (कुलपतिद्वारा नामितः सदस्य:) (प्रतिभासीय माध्यम से)
7. डॉ. कुलदीप कुमार , सहायक आचार्य- संस्कृत पालि एवं प्राकृत विभाग (विभागीय सदस्य:)

विभागाध्यक्ष.
संस्कृत पालि एवं प्राकृत विभाग

स॰ 2
BOS-13.2

# हिमाचल प्रदेश केंद्रीय विश्वविद्यालय
## Central University of Himachal Pradesh

हिमाचल ,धर्मशाला,176215, website: www.cuhimachal.ac.in

BOS-13.2

### संस्कृत पालि एवं प्राकृत विभागः

सारणी

| क्रमांक | | पाठ्यक्रम कूट संख्या Course Code | पाठ्यक्रम नाम Course Name | श्रेयांक Credit | पेपर तैयार करने से सम्बन्धित (बाहरी परीक्षकों द्वारा,प्रयोगशाला,सेमिनार, फील्ड वर्क) |
|---|---|---|---|---|---|
| **पाठ्यक्रमः - शास्त्री चतुर्थ सत्रम् (कुल श्रेयाङ्काः - 24) Courses for SHASTRI (BA SANSKRIT) – 4th SEMESTER** | | | | | |
| 1. | Major-1 | SKT404 | कारकं कृदन्तं च (Cases and Primary Nominals) | 4 | बाहरी परीक्षक द्वारा |
| 2. | Major-2 | SKT419 | महाकाव्यम् (Epic) | 4 | परीक्षक बाहरी द्वारा |
| 3. | Minor-1 | SKT435 | निर्वचनविज्ञानम् (Science of Etymology) | 4 | बाहरी परीक्षक द्वारा |
| 4. | Minor 2/ Interdisciplinary | SOC425 | भारते सामाजिकसमस्याः (Social Problems in India) | 4 | बाहरी परीक्षक द्वारा |
| 5. | Vocational/ Skill Development | SKT434 | वास्तुविद्या (Architecture) | 2 | बाहरी परीक्षक द्वारा |
| 6. | SBI | SKT491 | स्वच्छभारतप्रशिक्षुता (Swachh Bharat Internship) | 2 | प्रशिक्षुता (Internship) |
| 7. | EVS | SKT496 | पर्यावरणाध्ययनम् (Environmental Studies) | 4 | बाहरी परीक्षक द्वारा |

## कारकं कृदन्तं च (Cases and Primary Nominals)

**पाठ्यक्रमकूटक्रमाङ्कः**:– SKT404

**पाठ्यक्रमस्य शीर्षकम्** – **कारकं कृदन्तं च** (Cases and Primary Nominals)

**पाठ्यक्रमस्य उद्देश्यानि** -पाठ्यक्रमस्य उद्देश्यं वर्तते व्याकरणस्य अध्ययनद्वारा संस्कृतभाषायाः शुद्धप्रयोगस्य सामर्थ्यसम्पादनपुरस्सरं संस्कृतवाङ्मयस्य गभीराध्ययने सौकर्यसम्पादनम्, तथा च संस्कृतव्याकरणसिद्धान्तानां रचनात्मकावबोधसम्पादनम्।

**पाठ्यक्रमस्य प्रतिफलम्** -पाठ्यक्रमस्य प्रतिफलं वर्तते व्याकरणस्य अध्ययनद्वारा संस्कृतभाषायाः शुद्धप्रयोगं कर्तुं समर्थाः भविष्यन्ति, संस्कृतवाङ्मयस्य गभीराध्ययने सौकर्यसम्पादनं भविष्यति, तथा च संस्कृतव्याकरणसिद्धान्तानां रचनात्मकावबोधसम्पादनं भविष्यति।

**श्रेयाङ्काः** - 04 [एकम् क्रेडिट व्याख्यानम् – संघटितकक्ष्यागतिविधेः वैयक्तिकसम्पर्कस्य च 10 होरासमानम्, प्रयोगशालायाः/व्यावहारिककार्यस्य/अनुशिक्षणस्य/शिक्षकनियन्त्रितगतिविधीनां 5 होरासमानम्, अन्यकार्याणि यथा स्वतन्त्रव्यक्तिगतकार्याणि, सामूहिककार्याणि, निर्धारितानि अनिवार्य/वैकल्पिककार्याणि, साहित्यसमीक्षा, पुस्तकालयकार्याणि, तथ्यसंग्रहाः, शोधपत्रलेखनम्, संगोष्ठीपत्रलेखनादिम् 15 होरासमानं भवति ]

**उपस्थितेः अनिवार्यता** - पाठ्यविषयस्य पूर्णतया अवबोधाय तस्य च लाभानां सुनिश्चयाय छात्राणाम् कक्ष्यासु उपवेशनम् अत्यन्तमनिवार्यमस्ति। कक्ष्यासु न्यूनतम 75% उपस्थितिः न भवति चेत् छात्राणां परीक्षासु उपवेशनस्य अवसरः निरस्तीकर्तुं शक्यते।

| मूल्याङ्कनस्य विभागः | | **पूर्णाङ्काः – 200** |
|---|---|---|
| माध्यमिकी परीक्षा | - | 20% |
| सत्रान्तपरीक्षा | - | 60% |
| सततम् आन्तरिकमूल्याङ्कनम् | - | 20% |

## SKT404 -- कारकं कृदन्तं च (Cases and Primary Nominals)

❖ विषयान्तर्वस्तु

| अन्वितिसंख्या | विषयः | अङ्काः |
|---|---|---|
| 1. | **कृत्यप्रकरणम्**<br>**अस्य प्रकरणस्य सैद्धान्तिकं प्रायोगिकञ्च।** | 10% |
| 2. | **कृत्प्रकरणम्**<br>**अस्य प्रकरणस्य सैद्धान्तिकं प्रायोगिकञ्च।** | 35% |
| 3. | **उणादिप्रकरणम्**<br>**अस्य प्रकरणस्य सैद्धान्तिकं प्रायोगिकञ्च** | **10%** |
| 4. | **उत्तरकृदन्तप्रकरणम्**<br>**अस्य प्रकरणस्य सैद्धान्तिकं प्रायोगिकञ्च** | **20%** |
| 5. | **कारकप्रकरणम्**<br>**अस्य प्रकरणस्य सैद्धान्तिकं प्रायोगिकञ्च** | **25%** |

**निर्धारितग्रन्थः** -

## सन्दर्भग्रन्थाः –


1. मध्यसिद्धान्तकौमुदी, सुबोधिनीव्याख्या,चौखम्बा सुरभारती प्रकाशनम्, वाराणसी।
2. मध्यसिद्धान्तकौमुदी,बालमनोरमा संस्कृतटीका भाषाटीकासहितम्, चौखम्बा सुरभारती प्रकाशनम्, वाराणसी।
3. लघुसिद्धान्तकौमुदी, भैमी व्याख्या (भाग १-३) शास्त्री भीमसेन, भैमी प्रकाशन, दिल्ली।
4. सिद्धान्तकौमुदी, गोविन्दाचार्यः, मूलमात्रम्, चौखम्बा सुरभारती प्रकाशनम्, वाराणसी ।।
5. लघुसिद्धान्तकौमुदी, गोविन्दाचार्यः, चौखम्बासंस्कृतसंस्थान वाराणसी।
6. लघुसिद्धान्तकौमुदी, शास्त्री धरानन्दः, मूल एवं हिन्दी व्याख्या, मोती लाल बनारसी दास, नई दिल्ली।
7. सिद्धान्तकौमुदी, शास्त्री धरानन्दः, मूल एवं हिन्दी व्याख्या, मोती लाल बनारसी दास, नई दिल्ली।


## व्याख्यानानां योजना -

| व्याख्यानानां सङ्ख्या | व्याख्यानानां विषयाः | निर्धारितानि पुस्तकानि |
|---|---|---|
| 1,2,3,4, | कृत्यप्रकरणम् | 1 |
| **5,6,7,8,9,10,**11,12,13,14,15,16,17,18,19,20 | कृत्प्रकरणम् | 1 |
| 21,22,23,24,25 | **उणादिप्रकरणम्,** | 1 |
| **26,27,**28,29,30,31 | **उत्तरकृदन्तप्रकरणम्** | 1 |
| **32, 33,34,** 35,36,37, **38,39,40** | **कारकप्रकरणम्** | 1 |


निर्माणकर्त्री

डॉ. अर्चना कुमारी, सहायकाचार्या

संस्कृत पालि एवं प्राकृत विभागः

## संस्कृत-पालि-प्राकृत-विभागः
## हिमाचल प्रदेश केंद्रीय विश्वविद्यालयः,धर्मशाला

# शास्त्रिचतुर्थसत्रम्

**पाठ्यक्रम कूटक्रमाङ्कः –SKT419**

**पाठ्यक्रमस्य शीर्षकम्**- महाकाव्यम् (Epic)

**श्रेयाङ्कः** 04

**पाठ्यक्रम कूटक्रमाङ्कः –SKT419**

**पाठ्यक्रमस्य शीर्षकम्**- महाकाव्यम् (Epic)

(एकश्रेयव्याख्यानम्-संघटितकक्ष्यागतिविधेः वैयक्तिकसम्पर्कस्य च १० होरासमानम्, परियोजनायाः / व्यावहारिककार्यस्य / अनुशिक्षणस्य / शिक्षकनियन्त्रितगतिविधीनां ५ होरासमानम्, अन्यकार्याणि यथा स्वतन्त्रव्यक्तिगतकार्याणि, सामूहिककार्याणि, निर्धारितानि अनिवार्य/वैकल्पिककार्याणि, साहित्यसमीक्षा, पुस्तकालयकार्याणि, तथ्यसंग्रहाः, शोधपत्रलेखनम्, संगोष्ठीपत्रलेखनादिकम् १५ होरासमानं भवति)

**पाठ्यक्रमस्य उद्देश्यानि**- पाठ्यक्रमस्य उद्देश्यं छात्रेभ्यः तात्कालिकजीवनपद्धत्याः वर्तमानकाले उपादेयतायाः बोधेन सहैव राजनीतेः परिचयप्रदानपूर्वकं किरातार्जुनीयस्य गभीराध्ययनाय विश्लेषणाय च अवसरप्रदानमस्ति ।

**पाठ्यक्रमस्य प्रतिफलम्** -

1. काव्याध्ययने गद्यकाव्यस्य परिज्ञानम् ।
2. गद्यानाम् अर्थनिर्णये पदच्छेदान्वयविग्रहाणाम् आवश्यकतावगमः ।
3. अनधीतगद्यानां पदच्छेदान्वयविग्रहाणाम् अर्थनिर्णये संप्रयोगः ।
4. काव्यानां मार्मिकाध्ययनस्य प्रामुख्यम् ।
5. सांस्कृतिकाध्ययने काव्यानां महत्त्वावगमाभिवर्धनम् ।

**उपस्थितेः अनिवार्यता** - पाठ्यविषयस्य पूर्णतया अवबोधाय तस्य च लाभानां सुनिश्चयाय छात्राणां कक्ष्यासु उपवेशनम् अत्यन्तमनिवार्यमस्ति । कक्ष्यासु न्यूनतम ७५% उपस्थितिः न भवति चेत् छात्राणां परीक्ष्यासु उपवेशस्य अवसरः निरस्तीकर्तुं शक्यते ।

**मूल्याङ्कनस्य मापदण्डः-**

पूर्णाङ्कः- **200**

- माध्यमिकी परीक्षा -20%
- सत्रान्तपरीक्षा -60%
- सततम् आन्तरिकमूल्याङ्कनम् -20%

<u>विषयान्तर्वस्तु</u>

| अन्वितिसंख्या | विषयः | होराविभागः |
|---|---|---|
| १. | कविग्रन्थयोः परिचयः | (१०) |

- कविपरिचयः
- कालः
- देशः

- सम्पूर्णकथा-वस्तु
- मूलकथायां परिवर्तानानि
- काव्यवैशिष्ट्यम्

२. **प्रथमसर्गः** (१५)

- श्लोकव्याख्यानम्

३. **द्वितीयसर्गः** (१५)

- श्लोकव्याख्यानम्

**सन्दर्भग्रन्थाः–**

१. जनार्दनशास्त्री, भारवि कृत किरातार्जुनीयम्, मोतीलाल बनारसी दासः ।
